ओं नमः परमात्मने, श्री महागणपतये नमः

श्री गुरुभ्यो नमः

हरिः ओं

# कृष्ण यजुर्वेदीय तैत्तिरीय संहिता क्रम पाठः

## पञ्चम काण्डे, चतुर्थः प्रश्नः

# Table of Contents


5 कृष्ण यजुर्वेदीय तैत्तिरीय संहिता क्रम पाठः ...................................... 3

5.4 पञ्चम काण्डे चतुर्थः प्रश्नः – इष्टकात्रयाभिधानं......................... 3


============================

ओं नमः परमात्मने, श्री महागणपतये नमः

श्री गुरुभ्यो नमः, हरिः ओं

## 5 कृष्ण यजुर्वेदीय तैत्तिरीय संहिता क्रम पाठः

### 5.4 पञ्चम काण्डे चतुर्थः प्रश्नः – इष्टकात्रयाभिधानं

**TS 5.4.1.1 - Kramam**

देवासुराः सम्ँयत्ताः । देवासुरा इति देव – असुराः । सम्ँयत्ता आसन्न् । सम्ँयत्ता इति सम् – यत्ताः । आसन् ते । ते न । न वि । व्यजयन्त । अजयन्त सः । स एताः । एता इन्द्रः । इन्द्रस्तनूः । तनूरपश्यत् । अपश्यत् ताः । ता उप । उपाधत्त । अधत्त ताभिः । ताभिर् वै । वै सः । स तनुवम् । तनुवमिन्द्रियम् । इन्द्रियम् ँवीर्यम् । वीर्यमात्मन्न् । आत्मन्नधत्त । अधत्त ततः । ततो देवाः । देवा अभवन्न् । अभवन् परा । पराऽसुराः । असुरा यत् । यदिन्द्रतनूः । इन्द्रतनूरुपदधाति । इन्द्रतनूरितीन्द्र – तनूः । उपदधाति तनुवम् । उपदधातीत्युप – दधाति । तनुवमेव । एव ताभिः । ताभिरिन्द्रियम् । इन्द्रियम् ँवीर्यम् । वीर्यम् ँयजमानः । यजमान आत्मन्न् ।

आत्मन् धत्ते । धत्तेऽथो । अथो सेन्द्रम् । अथो इत्यथो । सेन्द्रमेव ।
सेन्द्रमिति स–इन्द्रम् । एवाग्निम् । अग्नि৺ सतनुम् । सतनुम् चिनुते ।
सतनुमिति स – तनुम् । चिनुते भवति । भवत्यात्मना । आत्मना परा ।
पराऽस्य । अस्य भ्रातृव्यः । भ्रातृव्यो भवति । **1 (50/57)**

**TS 5.4.1.2 - Kramam**

भवति यज्ञः । यज्ञो देवेभ्यः । देवेभ्योऽप । अपाक्रामत् । अक्रामत्
तम् । तमवरुधम् । अवरुधम् न । अवरुधमित्यव – रुधम् ।
नाशक्नुवन्न् । अशुक्नुवन् ते । त एताः । एता यज्ञतनूः ।
यज्ञतनूरपश्यन्न् । यज्ञतनूरिति यज्ञ–तनूः । अपश्यन् ताः । ता उप ।
उपादधत । अदधत ताभिः । ताभिर् वै । वै ते । ते यज्ञम् । यज्ञमव ।
अवारुन्धत । अरुन्धत यत् । यद् यज्ञतनूः । यज्ञतनूरुपदधाति ।
यज्ञतनूरिति यज्ञ – तनूः । उपदधाति यज्ञम् ।
उपदधातीत्युप – दधाति । यज्ञमेव । एव ताभिः । ताभिर् यजमानः ।
यजमानोऽव । अव रुन्धे । रुन्धे त्रयस्त्रि৺शतम् । त्रयस्त्रि৺शतमुप ।
त्रयस्त्रि৺शतमिति त्रयः – त्रि৺शतम् । उप दधाति ।
दधाति त्रयस्त्रि৺शत् । त्रयस्त्रि৺शद् वै ।

त्रयस्त्रि॒ꣳ॒शदि॒ति॒ त्रयः॑ – त्रि॒ꣳ॒श॒त्॒ । वै दे॒वताः᳚ । दे॒वता॑ दे॒वताः᳚ ।
दे॒वता॑ ए॒व । ए॒वाव॑ । अव॑ रुन्धे । रु॒न्धेऽथो᳚ । अथो॑ सा॒त्मान॑म् । अथो॒
इत्यथो᳚ । सा॒त्मान॑मे॒व । सा॒त्मान॒मि॒ति॒ स – आ॒त्मा॒न॒म् । ए॒वाग्निम् ।
अ॒ग्निꣳ स॒तनु॑म् । स॒तनु॑म् चिनुते । स॒त॒नु॒मि॒ति॒ स – त॒नु॒म् ।
चि॒नु॒ते॒ सा॒त्मा᳚ । सा॒त्मा॒ऽमुष्मि॒न्न्॑ । सा॒त्मे॒ति॒ स – आ॒त्मा॒ ।
अ॒मुष्मि॑न् ँलो॒के । लो॒के भ॑वति । 2 (50/60)

**TS 5.4.1.3 - Kramam**

भ॒व॒ति॒ यः । य ए॒वम् । ए॒वम् ँवेद॑ । वे॒द ज्योति॑ष्मतीः ।
ज्योति॑ष्मती॒रुप॑ । उप॑ दधाति । द॒धा॒ति॒ ज्योतिः॑ । ज्योति॑रे॒व ।
ए॒वास्मि॑न्न् । अ॒स्मि॒न् द॒धा॒ति॒ । द॒धा॒त्ये॒ता॑भिः । ए॒ताभि॒र् वै ।
वा अ॒ग्निः । अ॒ग्निश्चि॒तः । चि॒तो ज्व॑लति । ज्व॒ल॒ति॒ ताभिः॑ ।
ताभि॑रे॒व । ए॒वैनम्᳚ । ए॒न॒ꣳ॒ सम् । समि॑न्धे । इ॒न्ध॒ उ॒भयोः᳚ ।
उ॒भयो॑रस्मै । अ॒स्मै॒ लो॒कयोः᳚ । लो॒कयो॒र् ज्योति॑ः । ज्योति॑र् भवति ।
भ॒व॒ति॒ न॒क्ष॒त्रे॒ष्ट॒काः । न॒क्ष॒त्रे॒ष्ट॒का उप॑ । न॒क्ष॒त्रे॒ष्ट॑का इति
नक्षत्र – इ॒ष्ट॒काः । उप॑ दधाति । द॒धा॒त्ये॒तानि॑ । ए॒तानि॒ वै । वै दि॒वः ।
दि॒वो ज्योती॑ꣳषि । ज्योती॑ꣳषि॒ तानि॑ । तान्ये॒व । ए॒वाव॑ । अव॑ रुन्धे ।

रुन्धे सुकृताम् । सुकृताम् ँवै । सुकृतामिति सु - कृताम् ।

वा एतानि । एतानि ज्योती॑ᳲषि । ज्योती॑ᳲषि यत् । यन् नक्षत्राणि ।

नक्षत्राणि तानि । तान्येव । एवाप्नोति । आप्नोत्यथो ।

अथो अनूकाशम् । अथो इत्यथो । अनूकाशमेव ।

अनूकाशमित्यनु - काशम् । एवैतानि ( ) ।

एतानि ज्योती॑ᳲषि । **3 (50/54)**

**<u>TS 5.4.1.4 - Kramam</u>**

ज्योती॑ᳲषि कुरुते । कुरुते सुवर्गस्य । सुवर्गस्य लोकस्य ।

सुवर्गस्येति सुवः - गस्य । लोकस्यानुख्यात्यै । अनुख्यात्यै यत् ।

अनुख्यात्या इत्यनु - ख्यात्यै । यथ् सᳲस्पृष्टाः । सᳲस्पृष्टा

उपदद्ध्यात् । सᳲस्पृष्टा इति सम् - स्पृष्टाः । उपदद्ध्याद् वृष्ट्यै ।

उपदद्ध्यादित्युप - दद्ध्यात् । वृष्ट्यै लोकम् । लोकमपि । अपि

दद्ध्यात् । दद्ध्यादवर्.षुकः । अवर्.षुकः पर्जन्यः । पर्जन्यः स्यात् ।

स्यादसᳲस्पृष्टाः । असᳲस्पृष्टा उप । असᳲस्पृष्टा

इत्यसम् - स्पृष्टाः । उप दधाति । दधाति वृष्ट्यै । वृष्ट्या एव ।

एव लोकम् । लोकम् करोति । करोति वर्.षुकः ।

वर्.षुकः पर्जन्यः । पर्जन्यो भवति । भवति पुरस्तात् ।
पुरस्तादन्याः । अन्याः प्रतीचीः । प्रतीचीरुप । उप दधाति ।
दधाति पश्चात् । पश्चादन्याः । अन्याः प्राचीः । प्राची स्तस्मात् ।
तस्मात् प्राचीनानि । प्राचीनानि च । च प्रतीचीनानि ।
प्रतीचीनानि च । च नक्षत्राणि । नक्षत्राण्या । आ वर्तन्ते ।
वर्तन्त इति वर्तन्ते ॥ **4** (41/46)

*(भ्रातृव्यो – लोक – एवैतान्ये – कचत्वारिꣳशच्च) (A1)*

**TS 5.4.2.1 - Kramam**

ऋतव्या उप । उप दधाति । दधात्यृतूनाम् । ऋतूनाम् क्लृप्त्यै ।
क्लृप्त्यै द्वम्द्वम् । द्वम्द्वमुप । द्वम्द्वमिति द्वम् – द्वम् । उप दधाति ।
दधाति तस्मात् । तस्माद् द्वम्द्वम् । द्वम्द्वमृतवः । द्वम्द्वमिति द्वम्–द्वम् ।
ऋतवोऽधृता । अधृतेव । इव वै । वा एषा । एषा यत् । यन् मद्ध्यमा ।
मद्ध्यमा चितिः । चितिरन्तरिक्षम् । अन्तरिक्षमिव । इव वै ।
वा एषा । एषा द्वन्द्वम् । द्वन्द्वमन्यासु । द्वन्द्वमिति द्वम् – द्वम् ।
अन्यासु चितीषु । चितीषूप । उप दधाति । दधाति चतस्रः ।
चतस्रो मद्ध्ये । मद्ध्ये धृत्यै । धृत्या अन्तश्श्लेषणम् ।

अन्तश्श्लेषणम् ँवै । अन्तश्श्लेषणमित्यन्तः-श्लेषणम् । वा एताः ।

एताश्चितीनाम् । चितीनाम् ँयत् । यदृतव्याः । ऋतव्या यत् ।

यदृतव्याः । ऋतव्या उपदधाति । उपदधाति चितीनाम् ।

उपदधातीत्युप - दधाति । चितीनाम् ँविधृत्यै । विधृत्या अवकाम् ।

विधृत्या इति वि - धृत्यै । अवकामनु । अनूप । उप दधाति ।

दधात्येषा । एषा वै । वा अग्नेः । अग्नेर् योनिः । योनिः सयोनिम् ।

सयोनिमेव । सयोनिमिति स - योनिम् । **5** (**50/57**)

**TS 5.4.2.2 - Kramam**

एवाग्निम् । अग्निम् चिनुते । चिनुत उवाच । उवाच ह ।

ह विश्वामित्रः । विश्वामित्रोऽदत् । विश्वामित्र इति विश्व - मित्रः ।

अददित् । इथ् सः । स ब्रह्मणा । ब्रह्मणाऽन्नम् । अन्नम् ँयस्य ।

यस्यैताः । एता उपधीयान्तै । उपधीयान्तै यः । उपधीयान्ता

इत्युप-धीयान्तै । य उ । उ च । चैनाः । एना एवम् । एवम् ँवेदत् ।

वेददिति । इति सम्ँवथ्सरः । सम्ँवथ्सरो वै । सम्ँवथ्सर इति

सम् - वथ्सरः । वा एतम् । एतम् प्रतिष्ठायै । प्रतिष्ठायै नुदते ।

प्रतिष्ठाया इति प्रति – स्थायै । नुदते यः । योऽग्निम् ।
अग्निम् चित्वा । चित्वा न । न प्रतितिष्ठति । प्रतितिष्ठति पञ्च ।
प्रतितिष्ठतीति प्रति – तिष्ठति । पञ्च पूर्वाः । पूर्वाश्चितयः । चितयो
भवन्ति । भवन्त्यथ । अथ षष्ठीम् । षष्ठीम् चितिम् । चितिम् चिनुते ।
चिनुते षट् । षड् वै । वा ऋतवः । ऋतवः सम्ँवथ्सरः ।
सम्ँवथ्सर ऋतुषु । सम्ँवथ्सर इति सम् – वथ्सरः । ऋतुष्वेव ।
एव सम्ँवथ्सरे । सम्ँवथ्सरे प्रति । सम्ँवथ्सर इति सम्–वथ्सरे ।
प्रति तिष्ठति । तिष्टत्येताः । एता वै । वा अधिपत्नीः । **6 (50/57)**

**TS 5.4.2.3 - Kramam**

अधिपत्नीर् नाम । अधिपत्नीरित्यधि – पत्नीः । नामेष्टकाः । इष्टका
यस्य । यस्यैताः । एता उपधीयन्ते । उपधीयन्तेऽधिपतिः । उपधीयन्त
इत्युप – धीयन्ते । अधिपतिरेव । अधिपतिरित्यधि – पतिः ।
एव समानानाम् । समानानाम् भवति । भवति यम् । यम् द्विष्यात् ।
द्विष्यात् तम् । तमुपदधत् । उपदधद् ध्यायेत् । उपदधदित्युप–दधत् ।
ध्यायेदेताभ्यः । एताभ्य एव । एवैनम् । एनम् देवताभ्यः ।
देवताभ्य आ । आ वृश्चति । वृश्चति ताजक् । ताजगार्तिम् ।

आर्तिमा । आर्च्छति । ऋच्छत्यङ्गिरसः । अङ्गिरसः सुवर्गम् ।
सुवर्गम् ँलोकम् । सुवर्गमिति सुवः – गम् । लोकम् ँयन्तः ।
यन्तो या । या यज्ञस्य । यज्ञस्य निष्कृतिः । निष्कृतिरासीत् ।
निष्कृतिरिति निः – कृतिः । आसीत् ताम् । तामृषिभ्यः । ऋषिभ्यः
प्रति । ऋषिभ्य इत्यृषि–भ्यः । प्रत्यौहन्न् । औहन् तत् । तद्धिरण्यम् ।
हिरण्यमभवत् । अभवद् यत् । यद्धिरण्यशल्कैः । हिरण्यशल्कैः
प्रोक्षति । हिरण्यशल्कैरिति हिरण्य – शल्कैः । प्रोक्षति यज्ञस्य ।
प्रोक्षतीति प्र – उक्षति । यज्ञस्य निष्कृत्यै । निष्कृत्या अथो ।
निष्कृत्या इति निः – कृत्यै । अथो भेषजम् । अथो इत्यथो ।
भेषजमेव । एवास्मै । अस्मै करोति ( ) । करोत्यथो । 7 (50/61)

**TS 5.4.2.4 - Kramam**

अथो रूपेण । अथो इत्यथो । रूपेणैव । एवैनम् । एनꣳ सम् ।
समर्द्धयति । अर्द्धयत्यथो । अथो हिरण्यज्योतिषा । अथो इत्यथो ।
हिरण्यज्योतिषैव । हिरण्यज्योतिषेति हिरण्य – ज्योतिषा ।
एव सुवर्गम् । सुवर्गम् ँलोकम् । सुवर्गमिति सुवः – गम् ।
लोकमेति । एति साहस्रवता । साहस्रवता प्र ।

साहस्रवतेति साहस्र – वता । प्रोक्षति । उक्षति साहस्रः । साहस्रः प्रजापतिः । प्रजापतिः प्रजापतेः । प्रजापतिरिति प्रजा – पतिः । प्रजापतेराप्त्यै । प्रजापतेरिति प्रजा–पतेः । आप्त्या इमाः । इमा मे । मे अग्ने । अग्न इष्टकाः । इष्टका धेनवः । धेनवः सन्तु । सन्त्विति । इत्याह । आह धेनूः । धेनूरेव । एवैनाः । एनाः कुरुते । कुरुते ताः । ता एनम् । एनम् कामदुघाः । कामदुघा अमुत्र । कामदुघा इति काम – दुघाः । अमुत्रामुष्मिन्न् । अमुष्मिन् ँल्लोके । लोक उप । उप तिष्ठन्ते । तिष्ठन्त इति तिष्ठन्ते ॥ **8** (**39/47**)

*(सयोनि – मेता वै – करोत्ये – कान्नचत्वारिꣳशच्च) (A2)*

**TS 5.4.3.1 - Kramam**

रुद्रो वै । वा एषः । एष यत् । यदग्निः । अग्निः सः । स एतर्.हि । एतर्.हि जातः । जातो यर्.हि । यर्.हि सर्वः । सर्वश्चितः । चितः सः । स यथा । यथा वथ्सः । वथ्सो जातः । जातः स्तनम् । स्तनम् प्रेफ्सति । प्रेफ्सत्येवम् । प्रेफ्सतीति प्र – ईफ्सति । एवम् ँवै । वा एषः । एष एतर्.हि । एतर्.हि भागधेयम् । भागधेयम् प्र । भागधेयमिति भाग – धेयम् । प्रेफ्सति । ईफ्सति तस्मै ।

तस्मै यत् । यदाहुतिम् । आहुतिम् न । आहुतिमित्या - हुतिम् ।
न जुहुयात् । जुहुयाददध्वर्युम् । अद्ध्वर्युम् च । च यजमानम् ।
यजमानम् च । च ध्यायेत् । ध्यायेच्छतरुद्रीयम् । शतरुद्रीयम्
जुहोति । शतरुद्रीयमिति शत - रुद्रीयम् । जुहोति भागधेयेन ।
भागधेयेनैव । भागधेयेनेति भाग-धेयेन । एवैनम् । एनꣳ शमयति ।
शमयति न । नार्तिम् । आर्तिमा । आर्च्छति । ऋच्छत्यद्ध्वर्युः ।
अद्ध्वर्युर् न । न यजमानः । यजमानो यत् । यद् ग्राम्याणाम् ।
ग्राम्याणाम् पशूनाम् । पशूनाम् पयसा । **9 (50/55)**

**TS 5.4.3.2 - Kramam**

पयसा जुहुयात् । जहुयाद् ग्राम्यान् । ग्राम्यान् पशून् । पशूञ्छुचा ।
शुचाऽर्पयेत् । अर्पयेद् यत् । यदारण्यानाम् । आरण्यानामारण्यान् ।
आरण्यान् जर्तिलयवाग्वा । जर्तिलयवाग्वा वा । जर्तिलयवाग्वेति
जर्तिल - यवाग्वा । वा जुहुयात् । जुहुयाद् गवीधुकयवाग्वा ।
गवीधुकयवाग्वा वा । गवीधुकयवाग्वेति गवीधुक - यवाग्वा ।
वा न । न ग्राम्यान् । ग्राम्यान् पशून् । पशून्. हिनस्ति । हिनस्ति न ।
नारण्यान् । आरण्यानथो । अथो खलु । अथो इत्यथो । खल्वाहुः ।

आहुरनाहुतिः । अनाहुतिर् वै । अनाहुतिरित्यना – हुतिः ।
वै जर्तिलाः । जर्तिलाश्च । च गवीधुकाः । गवीधुकाश्च । चेति ।
इत्यजक्षीरेण । अजक्षीरेण जहोति । अजक्षीरेणेत्यज – क्षीरेण ।
जहोत्याग्नेयी । आग्नेयी वै । वा एषा । एषा यत् । यदजा ।
अजाऽऽहुत्या । आहुत्यैव । आहुत्येत्या – हुत्या । एव जुहोति ।
जुहोति न । न ग्राम्यान् । ग्राम्यान् पशून् । पशून्. हिनस्ति ।
हिनस्ति न । नारण्यान् । आरण्यानङ्गिरसः । अङ्गिरसः सुवर्गम् ।
सुवर्गम् ँल्लोकम् । सुवर्गमिति सुवः – गम् । लोकम् ँयन्तः ।
यन्तोऽजायाम् । **10 (50/57)**

**TS 5.4.3.3 - Kramam**

अजायाम् घर्मम् । घर्मम् प्र । प्रासिञ्चन्न् । असिञ्चन्थ् सा ।
सा शोचन्ती । शोचन्ती पर्णम् । पर्णम् परा । पराऽजिहीत ।
अजिहीत सः । सोऽर्कः । अर्कोऽभवत् । अभवत् तत् । तदर्कस्य ।
अर्कस्यार्कत्वम् । अर्कत्वमर्कपर्णेन । अर्कत्वमित्यर्क – त्वम् ।
अर्कपर्णेन जुहोति । अर्कपर्णेनेत्यर्क – पर्णेन । जुहोति
सयोनित्वाय । सयोनित्वायोदङ् । सयोनित्वायेति सयोनि – त्वाय ।

उदङ् तिष्ठन्न् । तिष्ठन् जुहोति । जुहोत्येषा । एषा वै । वै रुद्रस्य ।

रुद्रस्य दिक् । दिख् स्वायाम् । स्वायामेव । एव दिशि । दिशि

रुद्रम् । रुद्रम् निरवदयते । निरवदयते चरमायाम् । निरवदयत

इति निः – अवदयते । चरमायामिष्टकायाम् । इष्टकायाम् जुहोति ।

जुहोत्यन्ततः । अन्तत एव । एव रुद्रम् । रुद्रम् निरवदयते ।

निरवदयते त्रेधाविभक्तम् । निरवदयत इति निः – अवदयते ।

त्रेधाविभक्तम् जुहोति । त्रेधाविभक्तमिति त्रेधा – विभक्तम् ।

जुहोति त्रयः । त्रय इमे । इमे लोकाः । लोका इमान् । इमानेव ।

एव लोकान् । लोकान्थ् समावद्वीर्यान् । समावद्वीर्यान् करोति ।

समावद्वीर्यानिति समावत् – वीर्यान् । करोतीयति । इयत्यग्रे ।

अग्रे जुहोति । जुहोत्यथ । **11** (**50/57**)

**<u>TS 5.4.3.4 - Kramam</u>**

अथेयति । इयत्यथ । अथेयति । इयति त्रयः । त्रय इमे ।

इमे लोकाः । लोका एभ्यः । एभ्य एव । एवैनम् । एनम् ँलोकेभ्यः ।

लोकेभ्यः शमयति । शमयति तिस्रः । तिस्र उत्तराः । उत्तरा आहुतीः ।

उत्तरा इत्युत् – तराः । आहुतीर् जुहोति । आहुतीरित्या – हुतीः ।

जुहोति षट् । षट्थ् सम् । सम् पद्यन्ते । पद्यन्ते षट् । षड् वै ।

वा ऋतवः । ऋतव ऋतुभिः । ऋतुभिरेव । ऋतुभिरित्यृतु – भिः ।

एवैनम् । एनꣳ शमयति । शमयति यत् । यदनुपरिक्रामम् ।

अनुपरिक्रामम् जुहुयात् । अनुपरिक्राममित्यनु – परिक्रामम् ।

जुहुयादन्तरवचारिणम् । अन्तरवचारिणꣳ रुद्रम् ।

अन्तरवचारिणमित्यन्तः – अवचारिणम् । रुद्रम् कुर्यात् । कुर्यादथो ।

अथो खलु । अथो इत्यथो । खल्वाहुः । आहुः कस्याम् ।

कस्याम् ँवा । वाऽऽह । आह दिशि । दिशि रुद्रः । रुद्रः कस्याम् ।

कस्याम् ँवा । वेति । इत्यनुपरिक्रामम् । अनुपरिक्राममेव ।

अनुपरिक्राममित्यनु–परिक्रामम् । एव होतव्यम् । होतव्यमपरिवर्गम् ।

अपरिवर्गमेव । अपरिवर्गमित्यपरि – वर्गम् । एवैनम् ।

एनꣳ शमयति ( ) । शमयत्येताः । **12** (**50/58**)

**<u>TS 5.4.3.5 - Kramam</u>**

एता वै । वै देवताः । देवताः सुवर्ग्याः । सुवर्ग्या याः । सुवर्ग्या इति

सुवः – ग्याः । या उत्तमाः । उत्तमास्ताः । उत्तमा इत्युत् – तमाः ।

ता यजमानम् । यजमानम् ँवाचयति । वाचयति ताभिः । ताभिरेव ।
एवैनम् । एनꣳ सुवर्गम् । सुवर्गम् ँलोकम् । सुवर्गमिति
सुवः – गम् । लोकम् गमयति । गमयति यम् । यम् द्विष्यात् ।
द्विष्यात् तस्य । तस्य सञ्चरे । सञ्चरे पशूनाम् । सञ्चर इति
सम् – चरे । पशूनाम् नि । न्यस्येत् । अस्येद् यः । यः प्रथमः ।
प्रथमः पशुः । पशुरभितिष्ठति । अभितिष्ठति सः ।
अभितिष्ठतीत्यभि – तिष्ठति । स आर्तिम् । आर्तिमा । आर्च्छति ।
ऋच्छतीत्यृच्छति ॥ **13** (**30/35**)

***(पशूनाम् – यन्तो – अग्ने जुहोत्य – परिवर्गमेवैनꣳ शमयति – त्रिꣳशच्च) (A3)***

**TS 5.4.4.1 - Kramam**

अश्मन्नूर्जम् । ऊर्जमिति । इति परि । परिषिञ्चति । सिञ्चति
मार्जयति । मार्जयत्येव । एवैनम् । एनमथो । अथो तर्पयति ।
अथो इत्यथो । तर्पयत्येव । एव सः । स एनम् । एनम् तृप्तः ।
तृप्तोऽक्षुद्ध्यन्न् । अक्षुद्ध्यन्नशोचन्न् । अशोचन्नमुष्मिन्न् । अमुष्मिन्
ँलोके । लोक उप । उप तिष्ठते । तिष्ठते तृप्यति । तृप्यति प्रजया ।

प्रजया पशुभिः । प्रजयेति प्र – जया । पशुभिर् यः । पशुभिरिति पशु–भिः । य एवम् । एवम् वेद । वेद ताम् । ताम् नः । न इषम् । इष मूर्जम् । ऊर्जम् धत्त । धत्त मरुतः । मरुतः सꣳरराणाः । सꣳरराणा इति । सꣳरराणा इति सम् – रराणाः । इत्याह । आहान्नम् । अन्नम् वै । वा ऊर्क् । ऊर्गन्नम् । अन्नम् मरुतः । मरुतोऽन्नम् । अन्नमेव । एवाव । अव रुन्धे । रुन्धेऽश्मन्न् । अश्मꣳस्ते । ते क्षुत् । क्षुदमुम् । अमुम् ते । ते शुक् । शुगृच्छतु । **14 (50/54)**

**TS 5.4.4.2 - Kramam**

ऋच्छतु यम् । यम् द्विष्मः । द्विष्म इति । इत्याह । आह यम् । यमेव । एव द्वेष्टि । द्वेष्टि तम् । तमस्य । अस्य क्षुधा । क्षुधा च । च शुचा । शुचा च । चार्पयति । अर्पयति त्रिः । त्रिः परिषिञ्चन्न् । परिषिञ्चन् परि । परिषिञ्चन्निति परि – सिञ्चन्न् । पर्येति । एति त्रिवृत् । त्रिवृद् वै । त्रिवृदिति त्रि – वृत् । वा अग्निः । अग्निर् यावान् । यावानेव । एवाग्निः । अग्निस्तस्य । तस्य शुचम् । शुचꣳ शमयति । शमयति त्रिः । त्रिः पुनः । पुनः परि । पर्येति ।

एति षट् । षट्थ् सम् । सम् पद्यन्ते । पद्यन्ते षट् । षड् वै ।
वा ऋतवः । ऋतव ऋतुभिः । ऋतुभिरेव । ऋतुभिरित्यृतु - भिः ।
एवास्य । अस्य शुचम् । शुचꣳ शमयति । शमयत्यपाम् ।
अपाम् ँवै । वा एतत् । एतत् पुष्पम् । पुष्पम् ँयत् । यद् वेतसः ।
वेतसोऽपाम् । अपाꣳ शरः । **15 (50/53)**

**TS 5.4.4.3 - Kramam**

शरोऽवकाः । अवका वेतसशाखया । वेतसशाखया च ।
वेतसशाखयेति वेतस - शाखया । चावकाभिः । अवकाभिश्च ।
च वि । वि कर्.षति । कर्.षत्यापः । आपो वै । वै शान्ताः ।
शान्ताः शान्ताभिः । शान्ताभिरेव । एवास्य । अस्य शुचम् ।
शुचꣳ शमयति । शमयति यः । यो वै । वा अग्निम् । अग्निम्
चितम् । चितम् प्रथमः । प्रथमः पशुः । पशुरधिक्रामति ।
अधिक्रामतीश्वरः । अधिक्रामतीत्यधि - क्रामति । ईश्वरो वै ।
वै तम् । तꣳ शुचा । शुचा प्रदहः । प्रदहो मण्डूकेन । प्रदह
इति प्र - दहः । मण्डूकेन वि । वि कर्.षति । कर्.षत्येषः ।
एष वै । वै पशूनाम् । पशूनामनुपजीवनीयः । अनुपजीवनीयो न ।

अनुपजीवनीय इत्यनुप–जीवनीयः । न वै । वा एषः । एष ग्राम्येषु । ग्राम्येषु पशुषु । पशुषु हितः । हितो न । नारण्येषु । आरण्येषु तम् । तमेव । एव शुचा । शुचाऽर्पयति । अर्पयत्यष्टाभिः । अष्टाभिर् वि । वि कर्.षति । कर्.षत्यष्टाक्षरा । **16 (50/54)**

**TS 5.4.4.4 - Kramam**

अष्टाक्षरा गायत्री । अष्टाक्षरेत्यष्टा – अक्षरा । गायत्री गायत्रः । गायत्रोऽग्निः । अग्निर् यावान् । यावानेव । एवाग्निः । अग्निस्तस्य । तस्य शुचम् । शुचꣳ शमयति । शमयति पावकवतीभिः । पावकवतीभिरन्नम् । पावकवतीभिरिति पावक – वतीभिः । अन्नम् ँवै । वै पावकः । पावकोऽन्नेन । अन्नेनैव । एवास्य । अस्य शुचम् । शुचꣳ शमयति । शमयति मृत्युः । मृत्युर् वै । वा एषः । एष यत् । यदग्निः । अग्निर् ब्रह्मणः । ब्रह्मण एतत् । एतद् रूपम् । रूपम् ँयत् । यत् कृष्णाजिनम् । कृष्णाजिनम् कार्.ष्णी । कृष्णाजिनमिति कृष्ण – अजिनम् । कार्.ष्णी उपानहौ । कार्.ष्णी इति कार्.ष्णी । उपानहावुप । उप मुञ्चते । मुञ्चते ब्रह्मणा । ब्रह्मणैव । एव मृत्योः । मृत्योरन्तः । अन्तर् धत्ते ।

धत्तेऽन्तः । अन्तर् मृत्योः । मृत्योर् धत्ते । धत्तेऽन्तः । अन्तरन्नाद्यात् ।
अन्नाद्यादिति । अन्नाद्यादित्यन्न – अद्यात् । इत्याहुः । आहुरन्याम् ।
अन्यामुपमुञ्चते । उपमुञ्चतेऽन्याम् । उपमुञ्चत इत्युप – मुञ्चते ।
अन्याम् न । नान्तः ( ) । अन्तरेव । **17 (50/56)**

**TS 5.4.4.5 - Kramam**

एव मृत्योः । मृत्योर् धत्ते । धत्तेऽव । अवान्नाद्यम् । अन्नाद्यꣳ रुन्धे ।
अन्नाद्यमित्यन्न – अद्यम् । रुन्धे नमः । नमस्ते । ते हरसे । हरसे
शोचिषे । शोचिष इति । इत्याह । आह नमस्कृत्य । नमस्कृत्य हि ।
नमस्कृत्येति नमः – कृत्य । हि वसीयाꣳसम् ।
वसीयाꣳसमुपचरन्ति । उपचरन्त्यन्यम् । उपचरन्तीत्युप – चरन्ति ।
अन्यम् ते । ते अस्मत् । अस्मत् तपन्तु । तपन्तु हेतयः ।
हेतय इति । इत्याह । आह यम् । यमेव । एव द्वेष्टि । द्वेष्टि तम् ।
तमस्य । अस्य शुचा । शुचाऽर्पयति । अर्पयति पावकः । पावको
अस्मभ्यम् । अस्मभ्यꣳ शिवः । अस्मभ्यमित्यस्म – भ्यम् ।
शिवो भव । भवेति । इत्याह । आहान्नम् । अन्नम् वै । वै पावकः ।

पावकोऽन्नम् । अन्नमेव । एवाव । अव रुन्धे । रुन्धे द्वाभ्याम् ।
द्वाभ्यामधि । अधि क्रामति । क्रामति प्रतिष्ठित्यै । प्रतिष्ठित्या
अपस्यवतीभ्याम् । प्रतिष्ठित्या इति प्रति – स्थित्यै ।
अपस्यवतीभ्याꣳ शान्त्यै । अपस्यवतीभ्यामित्यपस्य – वतीभ्याम् ।
शान्त्या इति शान्त्यै ॥ **18** (**49/55**)

*(शु – ग्वेतसो ऽपा – मष्टाभिर्वि कर्.षति – नान्त – रेकान्नपञ्चाशच्च) (A4)*

**TS 5.4.5.1 - Kramam**

नृषदे वट् । नृषद इति नृ – सदे । वडिति । इति व्याघारयति ।
व्याघारयति पङ्क्त्या । व्याघारयतीति वि – आघारयति ।
पङ्क्त्याऽऽहुत्या । आहुत्या यज्ञमुखम् । आहुत्येत्या – हुत्या ।
यज्ञमुखमा । यज्ञमुखमिति यज्ञ–मुखम् । आ रभते । रभतेऽक्ष्णया ।
अक्ष्णया व्याघारयति । व्याघारयति तस्मात् । व्याघारयतीति
वि–आघारयति । तस्मादक्ष्णया । अक्ष्णया पशवः । पशवोऽङ्गानि ।
अङ्गानि प्र । प्र हरन्ति । हरन्ति प्रतिष्ठित्यै । प्रतिष्ठित्यै यत् ।
प्रतिष्ठित्या इति प्रति – स्थित्यै । यद् वषट्कुर्यात् ।

वषट्कुर्याद् यातयामा । वषट्कुर्यादिति वषट्कुर्यात् । यातयामाऽस्य ।
यातयामेति यात – यामा । अस्य वषट्कारः । वषट्कारः स्यात् ।
वषट्कार इति वषट्–कारः । स्याद् यत् । यन् न । न वषट्कुर्यात् ।
वषट्कुर्याद् रक्षाꣳसि । वषट्कुर्यादिति वषट् – कुर्यात् ।
रक्षाꣳसि यज्ञम् । यज्ञꣳ हन्युः । हन्युर् वट् । वडिति । इत्याह ।
आह परोक्षम् । परोक्षमेव । परोक्षमिति परः – अक्षम् । एव वषट् ।
वषट् करोति । करोति न । नास्य । अस्य यातयामा ।
यातयामा वषट्कारः । यातयामेति यात – यामा । वषट्कारो भवति ।
वषट्कार इति वषट् – कारः । भवति न । न यज्ञम् ।
यज्ञꣳ रक्षाꣳसि । रक्षाꣳसि घ्नन्ति । घ्नन्ति हुतादः । हुतादो वै ।
हुताद इति हुत – अदः । वा अन्ये । अन्ये देवाः ।
देवा अहुतादः । **19** (**50/64**)

**<u>TS 5.4.5.2 - Kramam</u>**

अहुतादोऽन्ये । अहुताद इत्यहुत–अदः । अन्ये तान् । तानग्निचित् ।
अग्निचिदेव । अग्निचिदित्यग्नि – चित् । एवोभयान् । उभयान्
प्रीणाति । प्रीणाति ये । ये देवाः । देवा देवानाम् । देवानामिति ।

इति दद्ध्ना । दद्ध्ना मधुमिश्रेण । मधुमिश्रेणाव । मधुमिश्रेणेति
मधु – मिश्रेण । अवोक्षति । उक्षति हुतादः । हुतादश्च । हुताद इति
हुत – अदः । चैव । एव देवान् । देवानहुतादः । अहुतादश्च ।
अहुताद इत्यहुत – अदः । च यजमानः । यजमानः प्रीणाति ।
प्रीणाति ते । ते यजमानम् । यजमानम् प्रीणन्ति । प्रीणन्ति दद्ध्ना ।
दद्ध्नैव । एव हुतादः । हुतादः प्रीणाति । हुताद इति हुत – अदः ।
प्रीणाति मधुषा । मधुषाऽहुतादः । अहुतादो ग्राम्यम् । अहुताद
इत्यहुत – अदः । ग्राम्यम् ँवै । वा एतत् । एतदन्नम् । अन्नम् ँयत् ।
यद् दधि । दध्यारण्यम् । आरण्यम् मधु । मधु यत् । यद् दद्ध्ना ।
दद्ध्ना मधुमिश्रेण । मधुमिश्रेणावोक्षति । मधुमिश्रेणेति
मधु – मिश्रेण । अवोक्षत्युभयस्य । अवोक्षतीत्यव – उक्षति ।
उभयस्यावरुद्ध्यै । अवरुद्ध्यै ग्रुमुष्टिना । अवरुद्ध्या
इत्यव – रुद्ध्यै । ग्रुमुष्टिनाऽव । अवोक्षति । उक्षति प्राजापत्यः ।
प्राजापत्यो वै । प्रजापत्य इति प्राजा – पत्यः । **20** (**50/61**)

**TS 5.4.5.3 - Kramam**

वै ग्रुमुष्टिः । ग्रुमुष्टिः सयोनित्वाय । सयोनित्वाय द्वाभ्याम् ।
सयोनित्वायेति सयोनि - त्वाय । द्वाभ्याम् प्रतिष्ठित्यै । प्रतिष्ठित्या
अनुपरिचारम् । प्रतिष्ठित्या इति प्रति - स्थित्यै । अनुपरिचारमव ।
अनुपरिचारमित्यनु - परिचारम् । अवोक्षति । उक्षत्यपरिवर्गम् ।
अपरिवर्गमेव । अपरिवर्गमित्यपरि - वर्गम् । एवैनान् ।
एनान् प्रीणाति । प्रीणाति वि । वि वै । वा एषः । एष प्राणैः ।
प्राणैः प्रजया । प्राणैरिति प्र - अनैः । प्रजया पशुभिः ।
प्रजयेति प्र - जया । पशुभिर्. ऋध्यते । पशुभिरिति पशु - भिः ।
ऋध्यते यः । योऽग्निम् । अग्निम् चिन्वन्न् । चिन्वन्नधिक्रामति ।
अधिक्रामति प्राणदाः । अधिक्रामतीत्यधि - क्रामति । प्राणदा
अपानदाः । प्राणदा इति प्राण - दाः । अपानदा इति । अपानदा
इत्यपान - दाः । इत्याह । आह प्राणान् । प्राणानेव । प्राणानिति
प्र - अनान् । एवात्मन्न् । आत्मन् धत्ते । धत्ते वर्चोदाः ।
वर्चोदा वरिवोदाः । वर्चोदा इति वर्चः - दाः । वरिवोदा इति ।
वरिवोदा इति वरिवः - दाः । इत्याह । आह प्रजा । प्रजा वै ।

प्रजेति प्र – जा । वै वर्चः । वर्चः पशवः । पशवो वरिवः ।
वरिवः प्रजाम् । प्रजामेव । प्रजामिति प्र – जाम् । एव पशून् ।
पशूनात्मन्न् । आत्मन् धत्ते । धत्त इन्द्रः । इन्द्रो वृत्रम् । वृत्रमहन्न् ।
अहन् तम् । तम् ँवृत्रः । वृत्रो हतः । **21 (50/65)**

**TS 5.4.5.4 - Kramam**

हतः षोडशभिः । षोडशभिर् भोगैः । षोडशभिरिति षोडश – भिः ।
भोगैरसिनात् । असिनाथ् सः । स एताम् । एतामग्नये ।
अग्नयेऽनीकवते । अनीकवत आहुतिम् । अनीकवत इत्यनीक–वते ।
आहुतिमपश्यत् । आहुतिमित्या – हुतिम् । अपश्यत् ताम् ।
तामजुहोत् । अजुहोत् तस्य । तस्याग्निः । अग्निरनीकवान् ।
अनीकवान्थ् स्वेन । अनीकवानित्यनीक – वान् । स्वेन भागधेयेन ।
भागधेयेन प्रीतः । भागधेयेनेति भाग – धेयेन । प्रीतः षोडशधा ।
षोडशधा वृत्रस्य । षोडशधेति षोडश – धा । वृत्रस्य भोगान् ।
भोगानपि । अप्यदहत् । अदहद् वैश्वकर्मणेन । वैश्वकर्मणेन पाप्मनः ।
वैश्वकर्मणेनेति वैश्व – कर्मणेन । पाप्मनो निः । निरमुच्यत ।
अमुच्यत यत् । यदग्नये । अग्नयेऽनीकवते । अनीकवत आहुतिम् ।

अनीकवत इत्यनीक - वते । आहुतिम् जुहोति ।

आहुतिमित्या - हुतिम् । जुहोत्यग्निः । अग्निरेव । एवास्य ।

अस्यानीकवान् । अनीकवान्थ् स्वेन । अनीकवानित्यनीक–वान् ।

स्वेन भागधेयेन । भागधेयेन प्रीतः । भागधेयेनेति भाग - धेयेन ।

प्रीतः पाप्मानम् । पाप्मानमपि । अपि दहति । दहति वैश्वकर्मणेन ।

वैश्वकर्मणेन पाप्मनः । वैश्वकर्मणेनेति वैश्व–कर्मणेन । पाप्मनो निः ।

निर् मुच्यते । मुच्यते यम् । यम् कामयेत । कामयेत चिरम् ।

चिरम् पाप्मनः ( ) । पाप्मनो निः । **22 (50/62)**

**TS 5.4.5.5 - Kramam**

निर् मुच्येत । मुच्येतेति । इत्येकैकम् । एकैकम् तस्य ।

एकैकमित्येकम्–एकम् । तस्य जहुयात् । जुहुयाच्चिरम् । चिरमेव ।

एव पाप्मनः । पाप्मनो निः । निर् मुच्यते । मुच्यते यम् ।

यम् कामयेत । कामयेत ताजक् । ताजक् पाप्मनः । पाप्मनो निः ।

निर् मुच्यत । मुच्यतेति । इति सर्वाणि । सर्वाणि तस्य ।

तस्यानुदृत्य । अनुदृत्य जुहुयात् । अनुदृत्येत्यनु - दृत्य ।

जुहुयात् ताजक् । ताजगेव । एव पाप्मनः । पाप्मनो निः ।

निर् मुच्यते । मुच्यतेऽथो । अथो खलु । अथो इत्यथो ।
खलु नाना । नानैव । एव सूक्ताभ्याम् । सूक्ताभ्याम् जुहोति ।
सूक्ताभ्यामिति सु – उक्ताभ्याम् । जुहोति नाना । नानैव ।
एव सूक्तयोः । सूक्तयोर् वीर्यम् । सूक्तयोरिति सु – उक्तयोः ।
वीर्यम् दधाति । दधात्यथो । अथो प्रतिष्ठित्यै । अथो इत्यथो ।
प्रतिष्ठित्या इति प्रति – स्थित्यै ॥ 23 (40/46) *(देवाः – प्राजापत्यो – वृत्र – श्शिरम् पाप्मन – श्चत्वारिꣳशच्च) (A5)*

**TS 5.4.6.1 - Kramam**

उदेनम् । एनमुत्तराम् । उत्तराम् नय । उत्तरामित्युत् – तराम् ।
नयेति । इति समिधः । समिध आ । समिध इति सम् – इधः ।
आ दधाति । दधाति यथा । यथा जनम् । जनम् यँते । यतेऽवसम् ।
अवसम् करोति । करोति तादृक् । तादृगेव । एव तत् । तत् तिस्रः ।
तिस्र आ । आ दधाति । दधाति त्रिवृत् । त्रिवृद् वै । त्रिवृदिति
त्रि – वृत् । वा अग्निः । अग्निर् यावान् । यावानेव । एवाग्निः ।
अग्निस्तस्मै । तस्मै भागधेयम् । भागधेयम् करोति ।

भागधेयमिति भाग - धेयम् । करोत्यौदुम्बरीः । औदुम्बरीर् भवन्ति ।

भवन्त्यूर्क् । ऊर्ग् वै । वा उदुम्बरः । उदुम्बर ऊर्जम् । ऊर्जमेव ।

एवास्मै । अस्मा अपि । अपि दधाति । दधात्युत् । उदु । उ त्वा ।

त्वा विश्वे । विश्वे देवाः । देवा इति । इत्याह । आह प्राणाः ।

प्राणा वै । प्राणा इति प्र - अनाः । वै विश्वे । विश्वे देवाः ।

देवाः प्राणैः । प्राणैरेव । प्राणैरिति प्र - अनैः । **24 (50/56)**

**<u>TS 5.4.6.2 - Kramam</u>**

एवैनम् । एनमुत् । उद् यच्छते । यच्छतेऽग्ने । अग्ने भरन्तु । भरन्तु

चित्तिभिः । चित्तिभिरिति । चित्तिभिरिति चित्ति - भिः । इत्याह ।

आह यस्मै । यस्मा एव । एवैनम् । एनम् चित्ताय । चित्तायोद्यच्छते ।

उद्यच्छते तेन । उद्यच्छत इत्युत् - यच्छते । तेनैव । एवैनम् । एनꣳ

सम् । समर्द्धयति । अर्द्धयति पञ्च । पञ्च दिशः । दिशो दैवीः ।

दैवीर् यज्ञम् । यज्ञमवन्तु । अवन्तु देवीः । देवीरिति । इत्याह ।

आह दिशः । दिशो हि । ह्येषः । एषोऽनु । अनु प्रच्यवते ।

प्रच्यवतेऽप । प्रच्यवत इति प्र - च्यवते । अपामतिम् ।

अमतिम् दुर्मतिम् । दुर्मतिम् बाधमानाः । दुर्मतिमिति दुः - मतिम् ।

बाधमाना इति । इत्याह । आह रक्षसाम् । रक्षसामपहत्यै । अपहत्यै रायः । अपहत्या इत्यप – हत्यै । रायस्पोषे । पोषे यज्ञपतिम् । यज्ञपतिमाभजन्तीः । यज्ञपतिमिति यज्ञ – पतिम् । आभजन्तीरिति । आभजन्तीरित्या – भजन्तीः । इत्याह । आह पशवः । पशवो वै । वै रायः । रायस्पोषः । पोषः पशून् । **25** (**50/57**)

**TS 5.4.6.3 - Kramam**

पशूनेव । एवाव । अव रुन्धे । रुन्धे षड्भिः । षड्भिर् हरति । षड्भिरिति षट् – भिः । हरति षट् । षड् वै । वा ऋतवः । ऋतव ऋतुभिः । ऋतुभिरेव । ऋतुभिरित्यृतु–भिः । एवैनम् । एन७ँ हरति । हरति द्वे । द्वे परिगृह्यवती । द्वे इति द्वे । परिगृह्यवती भवतः । परिगृह्यवती इति परिगृह्य–वती । भवतो रक्षसाम् । रक्षसामपहत्यै । अपहत्यै सूर्यरश्मिः । अपहत्या इत्यप – हत्यै । सूर्यरश्मिर्. हरिकेशः । सूर्यरश्मिरिति सूर्य – रश्मिः । हरिकेशः पुरस्तात् । हरिकेश इति हरि – केशः । पुरस्तादिति । इत्याह । आह प्रसूत्यै । प्रसूत्यै ततः । प्रसूत्या इति प्र – सूत्यै । ततः पावकाः । पावका आशिषः । आशिषो नः । आशिष इत्या – शिषः ।

नो जुषन्ताम् । जुषन्तामिति । इत्याह । आहान्नम् । अन्नम् वै ।

वै पावकः । पावकोऽन्नम् । अन्नमेव । एवाव । अव रुन्धे । रुन्धे

देवासुराः । देवासुराः सम्ँयत्ताः । देवसुरा इति देव - असुराः ।

सम्ँयत्ता आसन्न् । सम्ँयत्ता इति सम् - यत्ताः । आसन् ते ।

ते देवाः । देवा एतत् । एतदप्रतिरथम् । अप्रतिरथमपश्यन् ।

अप्रतिरथमित्यप्रति - रथम् । अपश्यन् तेन । तेन वै । वै ते ।

तेऽप्रति । अप्रत्यसुरान् । **26 (50/62)**

**TS 5.4.6.4 - Kramam**

असुरानजयन्न् । अजयन् तत् । तदप्रतिरथस्य ।

अप्रतिरथस्याप्रतिरथत्वम् । अप्रतिरथस्येत्यप्रति - रथस्य ।

अप्रतिरथत्वम् ँयत् । अप्रतिरथत्वमित्यप्रतिरथ - त्वम् ।

यदप्रतिरथम् । अप्रतिरथम् द्वितीयः । अप्रतिरथमित्यप्रति - रथम् ।

द्वितीयो होता । होताऽन्वाह । अन्वाहाप्रति । अन्वाहेत्यनु - आह ।

अप्रत्येव । एव तेन । तेन यजमानः । यजमानो भ्रातृव्यान् ।

भ्रातृव्यान् जयति । जयत्यथो । अथो अनभिजितम् । अथो इत्यथो ।

अनभिजितमेव । अनभिजितमित्यनभि - जितम् । एवाभि ।

अभि जयति । जयति दशर्चम् । दशर्चम् भवति । दशर्चमिति दश – ऋचम् । भवति दशाक्षरा । दशाक्षरा विराट् । दशाक्षरेति दश – अक्षरा । विराड् विराजा । विराडिति वि – राट् । विराजेमौ । विराजेति वि–राजा । इमौ लोकौ । लोकौ विधृतौ । विधृतावनयोः । विधृताविति वि – धृतौ । अनयोर् लोकयोः । लोकयोर् विधृत्यै । विधृत्या अथो । विधृत्या इति वि – धृत्यै । अथो दशाक्षरा । अथो इत्यथो । दशाक्षरा विराट् । दशाक्षरेति दश – अक्षरा । विराडन्नम् । विराडिति वि – राट् । अन्नम् ँविराट् । विराड् विराजि । विराडिति वि – राट् । विराज्येव । विराजीति वि–राजि । एवान्नाद्ये । अन्नाद्ये प्रति । अन्नाद्य इत्यन्न – अद्ये । प्रति तिष्ठति । तिष्ठत्यसत् । असदिव । इव वै । वा अन्तरिक्षम् । अन्तरिक्षमन्तरिक्षम् । अन्तरिक्षमिव । इवाग्नीद्ध्रम् । आग्नीद्ध्रमाग्नीद्ध्रे । आग्नीद्ध्रमित्याग्नि – इद्ध्रम् । आग्नीद्ध्रेऽश्मानम् । आग्नीद्ध्र इत्याग्नि – इद्ध्रे । **27** (**50/70**)

**TS 5.4.6.5 - Kramam**

अश्मानम् नि । नि दधाति । दधाति सत्त्वाय । सत्त्वाय द्वाभ्याम् ।

सत्त्वायेति सत् - त्वाय । द्वाभ्याम् प्रतिष्ठित्यै । प्रतिष्ठित्यै विमानः ।

प्रतिष्ठित्या इति प्रति - स्थित्यै । विमान एषः । विमान इति

वि-मानः । एष दिवः । दिवो मद्ध्ये । मद्ध्य आस्ते । आस्त इति ।

इत्याह । आह वि । व्येव । एवैतया । एतया मिमीते । मिमीते मद्ध्ये ।

मद्ध्ये दिवः । दिवो निहितः । निहितः पृश्निः । निहित इति

नि - हितः । पृश्निरश्मा । अश्मेति । इत्याह । आहान्नम् ।

अन्नम् वै । वै पृश्नि । पृश्न्यन्नम् । अन्नमेव । एवाव । अव रुन्धे ।

रुन्धे चतसृभिः । चतसृभिरा । चतसृभिरिति चतसृ - भिः ।

आ पुच्छात् । पुच्छादेति । एति चत्वारि । चत्वारि छन्दाꣳसि ।

छन्दाꣳसि छन्दोभिः । छन्दोभिरेव । छन्दोभिरिति छन्दः - भिः ।

एवेन्द्रम् । इन्द्रम् विश्वाः । विश्वा अवीवृधन्न् । अवीवृधन्निति ।

इत्याह । आह वृद्धिम् । वृद्धिमेव । एवोपावर्तते ।

उपावर्तते वाजानाम् । उपावर्तत इत्युप - आवर्तते ।

वाजाना॑ऽ सत्प॑तिम् । सत्प॑तिम् पति॑म् । सत्प॑तिमिति सत् – पतिम् । पति॑मिति । 28 (50/58)

**TS 5.4.6.6 - Kramam**

इत्या॑ह । आहान्न॑म् । अन्नम् वै । वै वाजः । वाजोऽन्न॑म् । अन्न॑मेव । एवाव॑ । अव॑ रुन्धे । रुन्धे सुम्नहूः । सुम्नहूर् यज्ञः । सुम्नहूरिति सुम्न – हूः । यज्ञो देवान् । देवाऽ आ । आ च॑ । च वक्षत् । वक्ष॑दिति । इत्या॑ह । आह प्रजा । प्रजा वै । प्रजेति प्र – जा । वै प॑शवः । प॑शवः सुम्नम् । सुम्नम् प्रजाम् । प्रजामेव । प्रजामिति॑ प्र – जाम् । एव पशून् । पशूनात्मन्न् । आत्मन् ध॑त्ते । धत्ते यक्षत् । य॑क्षदग्निः । अग्निर् देवः । देवो देवान् । देवाऽ आ । आ च॑ । च वक्षत् । वक्ष॑दिति । इत्या॑ह । आह स्वगाकृ॑त्यै । स्वगाकृत्यै वा॑जस्य । स्वगा॑कृत्या इति स्वगा – कृत्यै । वाज॑स्य मा । मा प्रसवे॑न । प्रसवेनो॑द्ग्राभे॑ण । प्रसवे॑नेति॑ प्र – सवे॑न । उद्ग्राभेणोत् । उद्ग्राभेणे॑त्युत् – ग्राभे॑ण । उदग्र॑भीत् । अग्रभीदिति॑ । इत्या॑ह । आहासौ । असौ वै । वा आ॑दित्यः । आदित्य उद्यन्न् । उ॑द्यन्नुद्ग्राभः । उद्यन्नि॑त्युत् – यन्न् । उद्ग्राभ एषः ( ) ।

उद्ग्राभ इत्युत् - ग्राभः । एष निम्रोचन्न् । निम्रोचन् निग्राभः ।
निम्रोचन्निति नि - म्रोचन्न् । निग्राभो ब्रह्मणा । निग्राभ इति
नि - ग्राभः । ब्रह्मणैव । एवात्मानम् । आत्मानमुद्गृह्णाति ।
उद्गृह्णाति ब्रह्मणा । उद्गृह्णातीत्युत् - गृह्णाति । ब्रह्मणा भ्रातृव्यम् ।
भ्रातृव्यम् नि । नि गृह्णाति । गृह्णातीति गृह्णाति ॥ **29** (**60/71**)

*(प्राणैः-पोषो-प्रत्या-ग्नीद्ध्रे-पति-मेष-दश च) (A6)*

**TS 5.4.7.1 - Kramam**

प्राचीमनु । अनु प्रदिशम् । प्रदिशम् प्र । प्रदिशमिति प्र - दिशम् ।
प्रेहि । इहि विद्वान् । विद्वानिति । इत्याह । आह देवलोकम् ।
देवलोकमेव । देवलोकमिति देव - लोकम् । एवैतया ।
एतयोपावर्तते । उपावर्तते क्रमद्ध्वम् । उपावर्तत इत्युप - आवर्तते ।
क्रमद्ध्वमग्निना । अग्निना नाकम् । नाकमिति । इत्याह ।
आहेमान् । इमानेव । एवैतया । एतया लोकान् । लोकान् क्रमते ।
क्रमते पृथिव्याः । पृथिव्या अहम् । अहमुत् । उदन्तरिक्षम् ।
अन्तरिक्षमा । आऽरुहम् । अरुहमिति । इत्याह । आहेमान् ।
इमानेव । एवैतया । एतया लोकान् । लोकान्थ् समारोहति ।

समारोहति सुवः । समारोहतीति सम् – आरोहति । सुवर्यन्तः ।
यन्तो न । नाप । अपेक्षन्ते । ईक्षन्त इति । इत्याह । आह सुवर्गम् ।
सुवर्गमेव । सुवर्गमिति सुवः – गम् । एवैतया । एतया लोकम् ।
लोकमेति । एत्यग्ने । अग्ने प्र । प्रेहि । इहि प्रथमः । **30 (50/55)**

**<u>TS 5.4.7.2 - Kramam</u>**

प्रथमो देवयताम् । देवयतामिति । देवयतामिति देव – यताम् ।
इत्याह । आहोभयेषु । उभयेष्वेव । एवैतया । एतया देवमनुष्येषु ।
देवमनुष्येषु चक्षुः । देवमनुष्येष्विति देव–मनुष्येषु । चक्षुर् दधाति ।
दधाति पञ्चभिः । पञ्चभिरधि । पञ्चभिरिति पञ्च – भिः ।
अधि क्रामति । क्रामति पाङ्क्तः । पाङ्क्तो यज्ञः । यज्ञो यावान् ।
यावानेव । एव यज्ञः । यज्ञस्तेन । तेन सह । सह सुवर्गम् । सुवर्गम्
ँ लोकम् । सुवर्गमिति सुवः – गम् । लोकमेति । एति नक्तोषासा ।
नक्तोषासेति । इति पुरोनुवाक्याम् । पुरोनुवाक्यामनु ।
पुरोनुवाक्यामिति पुरः – अनुवाक्याम् । अन्वाह । आह प्रत्यै ।
प्रत्या अग्ने । अग्ने सहस्राक्ष । सहस्राक्षेति ।
सहस्राक्षेति सहस्र – अक्ष । इत्याह । आह साहस्रः ।

साहस्रः प्रजापतिः । प्रजापतिः प्रजापतेः । प्रजापतिरिति प्रजा - पतिः । प्रजापतेराप्त्यै । प्रजापतेरिति प्रजा - पतेः । आप्त्यै तस्मै । तस्मै ते । ते विधेम । विधेम वाजाय । वाजाय स्वाहा । स्वाहेति । इत्याह । आहान्नम् । अन्नम् ँवै । वै वाजः । वाजोऽन्नम् । अन्नमेव । एवाव । अव रुन्धे । **31 (50/58)**

**TS 5.4.7.3 - Kramam**

रुन्धे दद्ध्नः । दद्ध्नः पूर्णाम् । पूर्णामौदुम्बरीम् । औदुम्बरी॑ स्वयमातृण्णायाम् । स्वयमातृण्णायाम् जुहोति । स्वयमातृण्णायामिति स्वयम्-आतृण्णायाम् । जुहोत्यूर्क् । ऊर्ग् वै । वै दधि । दद्ध्यूर्क् । ऊर्गुदुम्बरः । उदुम्बरोऽसौ । असौ स्वयमातृण्णा । स्वयमातृण्णाऽमुष्याम् । स्वयमातृण्णेति स्वयम् - आतृण्णा । अमुष्यामेव । एवोर्जम् । ऊर्जम् दधाति । दधाति तस्मात् । तस्मादमुतः । अमुतोऽर्वाचीम् । अर्वाचीमूर्जम् । ऊर्जमुप । उप जीवामः । जीवामस्तिसृभिः । तिसृभिः सादयति । तिसृभिरिति तिसृ - भिः । सादयति त्रिवृत् । त्रिवृद् वै । त्रिवृदिति त्रि - वृत् । वा अग्निः । अग्निर् यावान् । यावानेव । एवाग्निः । अग्निस्तम् ।

तम् प्रतिष्ठाम् । प्रतिष्ठाम् गमयति । प्रतिष्ठामिति प्रति – स्थाम् ।

गमयति प्रेद्धः । प्रेद्धो अग्ने । प्रेद्ध इति प्र – इद्धः । अग्ने दीदिहि ।

दीदिहि पुरः । पुरो नः । न इति । इत्यौदुम्बरीम् । औदुम्बरीमा ।

आ दधाति । दधात्येषा । एषा वै । वै सूर्मी । सूर्मी कर्णकावती ।

कर्णकावत्येतया । कर्णकावतीति कर्णक – वती । एतया ह । ह स्म ।

स्म वै । **32 (50/57)**

**<u>TS 5.4.7.4 - Kramam</u>**

वै देवाः । देवा असुराणाम् । असुराणाꣳ शततर्.हान् ।

शततर्.हाꣴस्तृꣳहन्ति । शततर्.हानिति शत – तर्.हान् । तृꣳहन्ति

यत् । यदेतया । एतया समिधम् । समिधमादधाति । समिधमिति

सम् – इधम् । आदधाति वज्रम् । आदधातीत्या – दधाति ।

वज्रमेव । एवैतत् । एतच्छतघ्नीम् । शतघ्नीम् ँयजमानः ।

शतघ्नीमिति शत – घ्नीम् । यजमानो भ्रातृव्याय । भ्रातृव्याय प्र ।

प्र हरति । हरति स्तृत्यै । स्तृत्या अच्छम्बट्कारम् । अच्छम्बट्कारम्

ँविधेम । अच्छम्बट्कारमित्यच्छम्बट् –कारम् । विधेम ते । ते परमे ।

परमे जन्मन्न् । जन्मन्नग्ने । अग्न इति । इति वैकङ्कतीम् ।

वैक॑ङ्कती॒मा । आ द॑धाति । द॒धा॒ति॒ भाः । भा ए॒व । ए॒वाव॑ । अव॑

रुन्धे । रु॒न्धे॒ ताम् । ताꣳ स॑वि॒तुः । स॒वि॒तुर् वरे᳚ण्यस्य । वरे᳚ण्यस्य

चि॒त्राम् । चि॒त्रामिति॑ । इति॑ शमी॒मयी᳚म् । श॒मी॒मयी॒ꣳ॒ शान्त्यै᳚ ।

श॒मी॒मयी॒मिति॑ शमी - मयी᳚म् । शान्त्या॑ अ॒ग्निः । अ॒ग्निर् वा᳚ ।

